## पृषोदरादीनि यथोपदिष्टम्। (१०९/१०३४)

[1]पृषोदरप्रकाराणि शब्दरूपाणि,[2]येषु लोपागमवर्णविकाराः [3]शास्त्रेण न विहिताः दृश्यन्ते च, तानि यथोपदिष्टानि साधूनि भवन्ति। [4]यानि यानि यथोपदिष्टानि, शिष्टैरुच्चारितानि प्रयुक्तानि, [5]तानि तथैवानुगन्तव्यानि। पृषद् उदरं यस्य [6]पृषोदरम्। पृषद् उद्वानं यस्य [7]पृषोद्वानम्। अत्र तकारलोपो भवति। वारिवाहकः बलाहकः। पूर्वशब्दस्य बशब्द आदेशः, उत्तरपदादेश्च लत्वम्। जीवनस्य मूतः[8] जीमूतः। वनशब्दस्य लोपः। शवानां शयनम् श्मशानम्। [9]शवशब्दस्य श्मादेशः, शयनशब्दस्यापि शानशब्द आदेशः। ऊर्ध्वं खमस्य इति उलूखलम्। ऊर्ध्वखशब्दयोः उलू खल इत्येतावादेशौ भवतः। पिशिताशः पिशाचः। [10]पिशिताशशब्दयोर्यथायोगं [11]पिशाचशब्दौ आदेशौ। ब्रुवन्तोऽस्यां सीदन्ति इति [12]बृसी। सदेरधिकरणे डट् प्रत्ययः। ब्रुवच्छब्दस्य चोपपदस्य बृशब्द आदेशो भवति। [13]मह्यां रौति इति मयूरः। रौतेरचि टिलोपः। महीशब्दस्य मयूभावः। एवमन्येऽपि अश्वत्थकपित्थ[14]प्रभृतयो यथायोगमनुगन्तव्याः।

[७६३] दिक्शब्देभ्य उत्तरस्य तीरस्य तारभावो वा भवति। (म. भा. ३.१७४)

दक्षिणतीरम्, दक्षिणतारम्। उत्तरतीरम्, उत्तरतारम्।

[७६४] वाचो वादे डत्वं च लभावश्चोत्तरपदस्येञि प्रत्यये भवति। (म. भा. ३.१७४)

वाचं वदति इति वाग्वादः। तस्यापत्यं [15]वाड्वालिः।

[७६५] षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं च भवति। (म. भा. ३.१७४)

षड् दन्ता अस्य षोडन्। षट् च दश च षोडश।

[७६६] धासु वा षष उत्वं भवत्युत्तरपदादेश्च ष्टुत्वम्। (म. भा. ३.१७४)

[16]षोढा, षड्धा कुरु। बहुवचननिर्देशो नानाधिकरणवाचिनो धाशब्दस्य [17]प्रतिपत्त्यर्थः। इह मा भूत्, षट् दधाति धयति[18] वा षड्धा इति।

[७६७] [19]दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वम्। (म. भा. ३.१७५)

कृच्छ्रेण दाश्यते [20]नाश्यते दभ्यते च यः स दूडाशः। दूणाशः। [21]दूडभः। दम्भेः खल्वननुनासिकलोपो निपातनात्। दुष्टं ध्यायति इति दूढ्यः। दुःशब्दोपपदस्य ध्यायतेः 'आतश्चोपसर्गे' (३.१.१३६/२८९८) इति कप्रत्ययः।

---

1. पृषोदरादीनि फ. 2. तेषां ह. 3. शास्त्रेण अविहिताः ह. 4. यानि ब. फ. 5. तानि तानि फ. 6. पृषोदरः फ. क. ह. 7. पृषोद्वानः फ. क., पृषद् उत्थानं यस्य स पृषोत्थानः ह. 8. भाजनम् इत्यधिकम् ड. 9. शवस्य फ. 10. पिशिताशयोः क, पिशिताशयोः यथासङ्ख्यम् ह. 11. पिश आच इत्येतौ ह. 12. बृसिः ह. 13. उदाहरणमिदं नास्ति फ. 14. महित्थ इत्यधिकम् ब.क.ड.फ.ह. 15. वाड्वलिः ब.क.ड, वाड्वली ह. 16. षोढा कुरु फ. ह. 17. परिग्रहार्थः ह. 18. इति ह. 19. दुरो दाशनाशदभेषु क, दुरो दाशनाशदभत्वं ब. 20. नाश्यते दश्यते ह. 21. दूडाभः ह.